प्रत्ययार्थेन च समानजातीये प्रकृत्यर्थे सति प्रत्यय इष्यते (म.भा. २. ३८०)। एकादश कार्षापणा अधिका अस्मिन् [1]कार्षापणशते एकादशं कार्षापणशतम् इति। इह [2]तु न भवति, एकादश माषा अधिका अस्मिन् कार्षापणशते इति (म. भा. २. ३८०)। शतसहस्रयोश्चेष्यते (म. भा. २. ३८०)। इह न भवति, एकादशाधिका अस्यां त्रिंशति इति। इतिकरणो विवक्षार्थ [3]इत्युक्तं, तत इदं सर्वं लभ्यते। कथम् एकादशं शतसहस्रम् इति? शतानां सहस्रं, सहस्राणां वा शतम् इति शतसहस्रम् इत्युच्यते। तत्र शतसहस्रयोः इत्येव सिद्धम्।

अधिके समानजाताविष्टं शतसहस्रयोः।
यस्य सङ्ख्या तदाधिक्ये डः कर्तव्यो [4]मतो मम ॥ (म. भा. २.३८०)

## शदन्तविंशतेश्च। (४६/१८४७)

तदस्मिन्नधिकम् इत्यनुवर्तते, डः इति च। शदन्तात् प्रातिपदिकात् [5]विंशतेश्च डः प्रत्ययो भवति तदस्मिन्नधिकम् इत्येतस्मिन् [6]विषये। त्रिंशदधिका अस्मिञ् छते त्रिंशं शतम्[7]। शद्ग्रहणेऽन्तग्रहणं प्रत्ययग्रहणे यस्मात् स तदादेरधिकार्थम्। एकत्रिंशं शतम्। एकचत्वारिंशं शतम्।

[५६६] सङ्ख्याग्रहणं च कर्तव्यम्। (म. भा. २. ३८१)

इह मा भूत्, गोत्रिंशदधिका अस्मिन् गोशते इति।

[५६७] विंशतेश्च। (म. भा. २.३८१)

[8]विंशं शतम्।

[५६८] तदन्तादपीति वक्तव्यम्। (म. भा. २. ३८१)

एकविंशं शतम्। सङ्ख्याग्रहणं च कर्तव्यम्। इह मा भूत्, गोविंशतिरधिकाऽस्मिन् गोशते इति ॥

## सङ्ख्याया गुणस्य निमाने मयट्। (४७/१८४८)

तदस्य इत्यनुवर्तते, तदस्य सञ्जातम् (५. २. ३६/१८३७) इत्यतः। तद् इति प्रथमासमर्थात् सङ्ख्या–वाचिनः प्रातिपदिकात् अस्य इति षष्ठ्यर्थे मयट् प्रत्ययो भवति यत् तत् प्रथमासमर्थं गुणस्य चेन् निमाने[9] वर्तते। गुणो भागः। निमानं मूल्यम्। गुणो येन निमीयते मूल्यभूतेन सोऽपि सामर्थ्याद् भाग एव [10]विज्ञायते। यवानां द्वौ भागौ निमानमस्य उदश्विद्भागस्य द्विमयमुदश्विद् यवानाम्। [11]त्रिमयम्। चतुर्मयम्। भागेऽपि तु विधीयमानः प्रत्ययः प्राधान्येन भागवन्तमाचष्टे। तेन सामान्याधिकरण्यं भवति द्विमयमुदश्वित् इति। गुणस्य [12]इति चैकत्वं विवक्षितं, तेनेह न भवति, द्वौ [13]भागौ यवानां त्रय उदश्वितः (म. भा. २. ३८२) इति।

---

1. कार्षापणशते नास्ति फ. 2. तु नास्ति क. 3. इति फ. 4. मते क. 5. विंशतिशब्दात् क. ड. फ. ह. 6. अर्थे क. फ. 7. चत्वारिंशं शतम् विंशं शतम् इत्यधिकम् ड. ह. 8. विंशतिः अधिका यस्मिन् इति इत्यधिकम् क. 9. तद् इत्यधिकम् क. 10. विज्ञाप्यते ह. 11. त्रिद्विमयम् क. 12. इति नास्ति क. 13. भागौ नास्ति क.